आकाशीयप्रदूषणेषु ध्वनिप्रदूषणनिवारणे वैदिकोपायाः

लेख प्रकाशित। दि: 2013 पृ: 45

# श्यामला

## संस्कृत साहित्ये
## पर्यावरण चिंतनम्
## विशेषाङ्कः



हिमाचल कला संस्कृति भाषा अकादमी

# श्यामला

## संस्कृत साहित्ये
## पर्यावरण चिंतनम्
## विशेषाङ्कः

## जून, दिसम्बर, 2013

**पूर्णाङ्कः 32**

मुख्य सम्पादकः
**डॉ. अरुण कुमार शर्मा** हि.प्र.से.

सम्पादकः
**गिरिजा शर्मा**

**प्रकाशकः**
**हिमाचल कला संस्कृति भाषा अकादमी**
**शिमला-171001**

ISBN : 978-8186755-83-7

विशेषाङ्कस्य शुल्कम् : ₹30/-
एकस्यांकस्य मूल्यम् : ₹15/-    पत्रिकायाः वार्षिकं शुल्कम् : ₹30/-

रचनाकाराणां विचाराः स्वकीयाः अस्माकं सम्मतिः नानिवार्या।

# क्रमः


| | | |
|---|---|---|
| **सम्पादकीयम्** | | |
| • पृथ्वीसूक्ते पर्यावरणम् | | 7 |
| • वैदिकवाङ्मये पर्यावरणचिन्तनम् | आचार्य रामानन्दः | 11 |
| • वैदिकं पर्यावरणविज्ञानम् | डॉ. सुन्दरनारायण झाः | 24 |
| • वेदेषु पर्यावरणविषयकविचाराः | डॉ. विनोद कुमार झाः | 33 |
| • पर्यावरणेष्वाकाशतत्त्वम् | डॉ. रामाशीष पाण्डेयः | 38 |
| • आकाशीयप्रदूषणेषु ध्वनिप्रदूषण-निवारणे वैदिकोपायाः | डॉ. बृहस्पति मिश्रः | 45 |
| • वेदेषु पर्यावरणरक्षणस्योपायाः | डॉ. गोकुल चन्द शर्मा | 53 |
| • पर्यावरणम् दोषास्तन्निरासश्च | प्रो. केशव शर्मा | 61 |
| • संस्कृतवाङ्मये पर्यावरणसंरक्षणम् | डॉ. शिव कुमार मिश्रः | 67 |
| • अथर्ववेदे जलप्रदूषणनिवारण-चिन्तनम् | डॉ. कृष्ण मोहन पाण्डेयः | 73 |
| • प्रदूषणं घोरतमोऽपराधः | आचार्य केशवराम शर्मा | 77 |
| • इह दुःखारण्ये | डॉ. ओम् प्रकाश सारस्वत | 79 |
| • पर्यावरणं प्रदूषणञ्च | डॉ. मदन लाल वर्मा | 80 |
| • पर्यावरणे वृक्षाणाम्महत्त्वम् | प्रो. खुशी राम शर्मा | 84 |
| • संस्कृतवाङ्मये पर्यावरणम् | डॉ. मदन मोहन शर्मा | 88 |
| • कालिदाससाहित्ये प्रकृतिः | डॉ. सुदेश गौतमः | 93 |
| • पर्यावरणम् | डॉ. रामकिशोर मिश्रः | 98 |
| • ज्योतिषशास्त्रे भूस्थानीयं पर्यावरणम् | डॉ. रमेश शर्मा | 100 |
| • पर्यावरणरक्षणोपायाः | आचार्य श्यामलाल शर्मा | 107 |
| • पर्यावरणप्रदूषणम् : समस्या समाधानञ्च | डॉ. ओम प्रकाश राही | 110 |
| • जलसम्बद्धाः काश्चन वैदिकसूक्तयः | डॉ. सन्तोष कुमार पाण्डेयः | 112 |
| • पर्यावरणसंस्कृतिशतकम् | डॉ. मनोहर लाल आर्यः | 115 |
| • हिमाचले षड्ऋतूणां वर्णनम् | प्रो. केशव शर्मा | 125 |
| • हिमाचले षड्ऋतुवैभवम् | डॉ. मनोहर लाल आर्यः | 128 |
| **हिमाचललोकः** | | |
| • कांगड़ावैभवशतकम् | डॉ. मनोहर लाल आर्यः | 130 |
| • ऋतुसंहारात् षडऋतूणां पद्यांशा | | 148 |



सचिव, हिमाचल कला संस्कृति भाषा अकादम्या प्रकाशिता, शिमला राजकीयमुद्रणालयेन मुद्रिता।

टंकण एवं पृष्ठसज्जा : **भूषण लता** सम्पादक : **गिरिजा शर्मा**

# आकाशीयप्रदूषणेषु ध्वनिप्रदूषणनिवारणे वैदिकोपायाः

डॉ. बृहस्पतिमिश्रः

वैदिकवाङ्मये आकाशतत्त्वस्य बहुभिः पर्यायैः विवेचनं प्राप्यते[1]। प्रत्येक-शब्दः आकाशपर्यायभूतोऽपि विशिष्टमर्थं द्योतयति[2], आकाशतत्त्वस्य च लक्षणं लक्षयति। यथा आकाशशब्दः व्यक्तं रूपं द्योतयति[1], व्योमशब्दः आकाशतत्त्वस्य सम्पूर्णजगतः सर्वेषां क्रियाकलापानां कृते अवकाशं रिक्तस्थानप्रदानमित्यर्थं व्यनक्ति[3]। अम्बरशब्दः आकाशस्य गुणः शब्दः[4] इत्यर्थं ज्ञापयति। एवमेव अन्यानि पर्यायनामान्यपि आकाशतत्त्वस्य स्वरूपं सुस्पष्टी कुर्वन्ति[5]।

एतस्य आकाशतत्त्वस्य रिक्तस्थानस्य विस्तारः मनुष्यः स्वक्रियाकलापैः पूरयति। विशेषतः पृथिव्यां स्वनिकटस्थं रिक्तस्थानं पूरयति एतेन मनुष्यसमुदायः कष्टमनुभवति। इत्थमेव आकाशतत्त्वस्य गुणः शब्दः आकाशस्य आश्रये भवति[6]। एतस्य उत्पत्तिः संयोगवियोगाभ्यां भवति[7]। एषः शब्दः यदि प्राणिमात्रं दुनोति चेत् शब्दस्य आकाशगुणत्वात् आकाशीयं कष्टम्। अत एव शब्दप्रदूषणमपि आकाशीयप्रदूषणेषु मन्यते। एव आधुनिकानि प्रदूषणानि— ध्वनिप्रदूषणम्, अन्तरिक्षप्रदूषणं, जनसंख्याप्रदूषणञ्च आकाशीयानि प्रदूषणानि भवन्ति। एतेषु त्रिषु प्रदूषणेषु ध्वनिप्रदूषणस्य वैदिकनिवारणोपायाः लिख्यन्ते।

ध्वनिप्रदूषणं प्राणिनां शारीरिकं मानसिकञ्चोभयविधं कष्टकारकं भवति। अद्यतनपर्यावरणवैज्ञानिनः अत्युच्च-आवृत्तिमन्तः ध्वनयः, मध्यमोच्च-आवृत्तिमन्तश्च सततं प्रवाहिताः ध्वनयः प्रदूषणकारकाः मन्यन्ते यतोहि ते एव स्थूलरूपेण हानिप्रदाः परिलक्ष्यन्ते।

किन्तु वैदिकचिन्तनम् ध्वनिप्रदूषणविषये अत्यन्तं गम्भीरम्। वैदिकवाङ्मये ध्वनिचिन्तनमेकेन समृद्धपरम्परारूपेण स्थापितम्[8]। व्यक्तरूपाः अव्यक्तरूपाश्च ध्वनेः द्वौ भेदौ स्तः। एषः भेदः श्रोतुः सापेक्षम् भवति। वस्तुतः ध्वनेः भेद-तात्पर्यं तु श्रोतृसम्बन्धमेव (अत एव अरण्यरोदनम् इति शब्दः निरर्थक कार्यवाची अस्ति)। श्रोता येन ध्वनिना तात्पर्यम् अवगच्छति सः व्यक्तध्वनिः। यश्च ध्वनिः श्रोतुः कृते किमपि अर्थं न व्यनक्ति सः अव्यक्तध्वनिः कथ्यते। एतौ अव्यक्तव्यक्तौ ध्वनी[9] कष्टकरस्थितौ प्रदूषणम् उत्पादयतः। व्यक्तध्वनिः अधिककष्टकारको